द्युम्नं, क्ली, (द्युम्नमिंं मनति अभ्यसत्यसे इति । म्ना+कः । "धनमिच्छेत् हुताशनात् ।" इति वचनात् धनकामानां अग्न्याराधनादस्य तथात्वम् ।) धनम् । इत्यमरः । २ । ९ । ९० ॥ (यथा, ऋग्वेदे । २ । २ । १० ।
"अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्वर्णं शुशुचीत दुष्टरम् ॥"
द्युं तेजो मनतीति ।) बलम् । इति मेदिनी । ने, ११ ॥ (बलाधायकत्वात् अन्नम् । यथा, ऋग्वेदे । ६ । ८ । ८ ।
"इह दिवः परि स्व द्युम्नं पृथिव्या अधि ॥")

द्युवा, [न्] पुं, (द्योतीति । द्यु+"कनिन् युवृषीति ।" उणा° १ । १५६ । इति कनिन् ।) सूर्य्यः । इत्युणादिकोषः ॥ द्यौः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

द्युष(स)त्, [द्] पुं, (दिवि स्वर्गे सीदतीति । सद्+क्विप् । छन्दसि षत्वम् । लोकेऽसत्वम् ।) देवः । इति त्रिकाण्डशेषः ॥ (यथा, माघे । १ । ४३ ।
"भयस्य पूर्व्वावतरस्तरस्विना
मनःसु येन द्युसदां न्यधीयत ॥")
ग्रहः । इति गोलाध्यायः ॥

द्यूतः, पुं, क्ली, (देवनमिति । दिवु क्रीड़ायाम्+भावे+क्तः । ऊट् च ।) पाशकादिक्रिया । अप्राणिकरणकक्रीड़ा । जुया इति भाषा । तत्पर्य्यायः । अक्षवती २ कैतवम् ३ पणः ४ । इत्यमरः । २ । १० । ४५ ॥ (यथा, देवीभागवते । १ । १८ । ५१ ।
"द्यूतक्रीड़ा तथा प्रोक्ता व्रतानि विविधानि च ॥")
"द्यूतं समाह्वयञ्चैव राजा राष्ट्रान्निवर्त्तयेत् ।
राजान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षिताम् ॥
प्रकाशमेतत्तास्कर्य्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत् ॥
अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः ॥
द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा ।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥
द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं महत् ।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥"
इति मनुः । ९ । २२१-२२७ ॥
कङ्क उवाच ।
"किन्ते द्यूतेन राजेन्द्र ! बहुदोषेण मानद ! ।
देवने बहवो दोषास्तस्मात्तत् परिवर्ज्जयेत् ॥
श्रुतस्ते यदि वा दृष्टः पाण्डवो हि युधिष्ठिरः ।
स राज्यं सुमहत् स्फीतं भ्रातॄंश्च त्रिदशोपमान् ॥
द्यूते हारितवान् सर्व्वं तस्माद्द्यूतं न रोचये ॥"
इति महाभारते । ४ । ६६ । ३३-३५ ॥

द्यूतकरः, त्रि, (करोतीति । कृ+अच् । द्यूतस्य करः ।) द्यूतकर्त्ता । जुयारी इति भाषा । तत्पर्य्यायः । धूर्त्तः २ धूर्त्तः ३ अक्षधूर्त्तः ४ अक्षदेवी ५ दुरोदरः ६ द्यूतकृत् ७ कितवः ८ कष्टाकोकलः ९ । इति शब्दरत्नावली ॥

II

द्यूतकारः, त्रि, (द्यूतं कारयतीति । कृ+णिच्+अच् ।) द्यूतकारयिता । सक्षियार इति ख्यातः । इति भरतः ॥ तत्पर्य्यायः । सभिकः २ । इत्यमरः । २ । १० । ४४ ॥ सभीकः ३ । इति शब्दरत्नावली ॥ (यथा, पञ्चतन्त्रे । १ । ४३१ ।
"मुहुर्व्विनिन्नितकर्म्माणं द्यूतकारं पराजितम् ॥")

द्यूतकारकः, त्रि, (द्यूतं कारयतीति । द्यूत+कृ+णिच्+ण्वुल् ।) द्यूतकारयिता ॥

द्यूतकृत्, त्रि, (द्यूतं करोतीति । कृ+क्विप् तुगागमश्च ।) द्यूतकरः । अक्षक्रीड़कः । इत्यमरः । २ । १० । ४४ ॥

द्यूतपूर्णिमा, स्त्री, (द्यूताय या पूर्णिमा ।) कोजागरपूर्णिमा । इति त्रिकाण्डशेषः ॥

द्यूतपौर्णमासी, स्त्री, (द्यूताय या पौर्णमासी ।) द्यूतपूर्णिमा । इति भूरिप्रयोगः ॥

द्यूतप्रतिपत्, [द्] स्त्री, (द्यूताय क्रीड़ार्थं या प्रतिपत् ।) कार्त्तिकशुक्लप्रतिपत् । सा च कौमुदी । यथा,—
"तुलार्थे कार्त्तिके तस्य शुक्ला या प्रतिपत्तिथिः ।
विष्णोर्दत्ता मही तत्र कौमुदी सा स्मृता बुधैः ॥
कुशब्देन मही ज्ञेया मुदा हर्षे च वै द्विज ! ।
धातुज्ञैः सर्व्वशब्दज्ञैः सा च वै कौमुदी स्मृता ॥"
इति पाद्मोत्तरखण्डम् ॥ * ॥
अत्र तिथौ बलिदैत्यपूजादि कार्य्यम् । तद्यथा,
"वामनपुराणे कार्त्तिकशुक्लपक्षमधिकृत्य बलिम्प्रति भगवद्वाक्यम् ।
वीरप्रतिपदा नाम तव भावी महोत्सवः ।
अत्र त्वां नरशार्दूल ! हृष्टाः पुष्टाः स्वलङ्कृताः ॥
पुष्पदीपप्रदानेन पूजयिष्यन्ति मानवाः ॥
अत्र मन्त्रः ।
बलिराज ! नमस्तुभ्यं विरोचनसुत ! प्रभो ।
भविष्येन्द्र सुराराते ! पूजेयं प्रतिगृह्यताम् ॥
ब्रह्मपुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वम् ।
मन्त्रेणानेन राजेन्द्र ! समन्त्री सपुरोहितः ॥
इत्यर्द्धम् । पश्चादपि ।
एवं पूजां नृपः कृत्वा रात्रौ जागरणं चरेत् ।
इत्युक्तम् ॥ पुनर्ब्रह्मपुराणे ।
शङ्करश्च पुरा द्यूतं ससर्ज्ज सुमनोहरम् ।
कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते ! ॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्व्वती ।
अतोऽर्थाच्छङ्करो दुःखी गौरी नित्यं सुखोषिता ॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः ।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः ॥
पराजयो विरुद्धश्च लब्धनाशकरो भवेत् ॥
भविष्योत्तरे ।
यो यो याद्दशभावेन तिष्ठत्यस्यां युधिष्ठिर ! ।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि ॥
महापुण्या तिथिरियं बलिराज्यप्रवर्द्धिनी ।
स्नानं दानं शतगुणं कार्त्तिकेऽस्यां तिथौ भवेत् ॥"
इति तिथितत्त्वम् ॥

द्यूतबीजं, क्ली, (द्यूतस्य बीजं कारणम् ।) कपर्द्दकः । इति त्रिकाण्डशेषः ॥ द्यूतस्य कारणञ्च ॥

द्यूनं, क्ली, लग्नात् सप्तमराशिः । यथा —
"धीस्थानं पञ्चमं ज्ञेयं यामित्रं सप्तमं स्मृतम् ।
द्युनं द्यूनं तथास्ताख्यं षट्कोणं रिपुभान्दरम् ॥"
इति ज्योतिस्तत्त्वम् ॥
(दिव्+क्तः । "दिवोऽविजिगीषायाम् ।" ८ । २ । ४९ । इति निष्ठातस्य नः । च्छ्वोरित्यूट् । द्यूने, त्रि ॥)

द्यै, न्यक्करणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट् ।) अन्त्यस्थाद्ययुक्तः । द्यायति दुष्टं लोकः । इति दुर्गादासः ॥

द्योतः, पुं, (द्युत्+भावे घञ् ।) प्रकाशः । (यथा, हरिवंशे । २३३ । २४ ।
"विद्युद्द्योतनिकाशेन मुकुटेनार्कवर्च्चसा ॥")
आतपः । इत्यमरः । १ । ४ । ३४ ॥

द्योतनं, क्ली, (द्युत्+भावे ल्युट् ।) दर्शनम् । इति हेमचन्द्रः । ३ । २४१ ॥ प्रकाशनम् ॥ (द्युत्+युच् । द्योतमाने, त्रि । यथा, भट्टिः । ७ । १५ ।
"विलोक्य द्योतनं चन्द्रं लक्ष्मणं शोचनोऽवदत् ॥")

द्योतनः, पुं, (द्योततीति । द्युत्+"बहुलमन्यत्रापि ।" उणा° २ । ७८ । इति युच् ।) दीपः । इत्युणादिकोषः ॥

द्योतितं, त्रि, (द्युत+क्तः ।) द्युतितम् । दीप्तम् । इति मुग्धबोधव्याकरणम् ॥ (यथा, रामायणे । २ । ८२ । २ ।
"वस्त्राङ्गरागप्रभया द्योतिता सा सभोत्तमा ॥")

द्योभूमिः, पुं, (द्यौराकाशं भूमिरिव यस्य ।) पक्षी । इति शब्दचन्द्रिका ॥ स्वर्गपृथिव्योः स्त्री । अत्र द्विवचनान्तः ॥

द्योषत्, [द्] पुं, (द्यवि स्वर्गे सीदतीति । सद्+क्विप् ।) देवः । इति शब्दरत्नावली ॥

द्यौः, [ओ] स्त्री, (द्योतन्ते देवा यत्र । द्युत्+बाहुलकात् डोः ।) स्वर्गः । (यथा, महाभारते । १ । ७४ । २८ ।
"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मश्च जानाति नरस्य वृत्तम् ॥")
आकाशम् । इत्यमरः । १ । १ । ६ ॥ (पुं, अष्टवसूनामन्यतमः । यथा, देवीभागवते । २ । ३ । ३५ ।
"पृथ्वादीनां वसूनाञ्च मध्ये कोऽपि वसूत्तमः ।
द्योर्नामा तस्य भार्य्या या नन्दिनीं गां ददर्श ह ॥"
अयमेव वशिष्ठशापात् पृथिव्यां जन्म परिगृह्णन् भीष्म इति नाम्ना विख्यात आसीत् ॥
अस्य विवरणन्तु देवीभागवते २ स्कन्धे ३ अध्याये तथा महाभारते । १ । ९९ अध्याये द्रष्टव्यम् ॥)

द्यौत्रं, क्ली, (दीव्यन्त्यस्मिन्निति । दिव+"दिवेर्द्युच ।" उणा° ४ । १६० । इति त्र द्युरादेशो वृद्धिश्च ।) ज्योतिः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

द्रगड़ः, पुं, वाद्यविशेषः । दगड़ इति भाषा । तत्पर्य्यायः । प्रतिपत्तूर्य्यम् २ । इति त्रिकाण्डशेषः ॥